**दिनाङ्क :- 22.01.2026**

**प्रात: - 06:55**

## कैबिनेट अटल पेन्शन योजना

प्रशासनेन एकत्रिंशदधिक द्विसहस्रतम वर्षपर्यन्तं अटल-पेन्शन-योजनायाः अनुवर्तनं, प्रचार-विकास-कार्याणां कृते वित्तपोषणस्य विस्तारः च स्वीकृतः। असङ्गठितक्षेत्रस्य कर्मचारिभ्यः वृद्धावस्थायाम् आयस्य सुरक्षां प्रदातुं पञ्चदशोत्तरद्विसहस्र-तमवर्षस्य मई-मासे इयं योजना आरब्धा। नवदेहली-नगरे प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य आध्यक्ष्ये आयोजितायां वरिष्ठमन्त्रि-सभायाम् अयं निर्णयः कृतः। एषा योजना अभिदातॄणां योगदानाधारेण षष्ठि-वयसः अनन्तरं प्रतिमासं एकसहस्रतः पञ्चसहस्रपर्यन्तं निश्चितं न्यूनतमं निवृत्तिवेतनम् प्रदीयते। अद्यावधि अस्याः योजनायाः अन्तर्गतं सार्धाष्टकोटितोऽधिकाः अभिदातारः नामाङ्किताः सन्ति। योजनैषा देशस्य समावेशी-सामाजिक-सुरक्षा-संरचनायाः आधारशिला अस्तीति सिध्यते।

## अश्विनी-ए.आई. दावोसः

केन्द्रीय-इलेक्ट्रानिक्स् अथ सूचना-तन्त्रज्ञान-मन्त्री अश्विनी-वैष्णवः अवदत् यत् ए.आई. इत्यस्य विनियमने न केवलं स्वतन्त्रनियमानामनुपालनं स्यात् अपितु टेक्नो-लीगल इति पद्धत्याः अनुसरणमपि कर्तव्यमिति। सः दावोस-नगरे विश्व-आर्थिक-मञ्चे भाषणं कुर्वन् एतदुक्तवान् यत् पक्षपातः, गहन-मिथ्याचारेत्यादीनां सङ्कटानां निवारणार्थं दृढ-तान्त्रिक-साधनानां आवश्यकतायाः विषये अवधानं दातव्यमिति। सः इत्यपि अवदत् यत्, भारतं पक्षपातं न्यूनीकर्तुं, विश्वसनीयं गहनं मिथ्या-अभिज्ञानम् समर्थयितुं, तथा च ए. आई. माडेल्स् इत्यस्य प्रयोगात् पूर्वं समुचितं अज्ञानं सुनिश्चितं कर्तुं प्रौद्योगिकीः विकासयतीति। अत्रान्तरे, श्री वैष्णवः दावोस-नगरे विश्व-आर्थिक-मञ्चस्य पार्श्वे आई. बी. एम्. संस्थायाः सी. ई. ओ. अरविन्द-कृष्णं अथ च मेटा-संस्थायाः मुख्य-वैश्विक-कार्य-अधिकारी जोयल् कप्लान् इत्येतमपि मिलितवान्। सामाजिक-प्रसार-माध्यमे मन्त्री अवदत् यत् विश्वदृष्ट्या भारतं वैश्विक-नवान्वेषणस्य प्रमुख-चालक-रूपेण अस्तीति।

## पश्चिमबंगालस्य मतदातृसूच्यां

पश्चिमबंगालस्य मतदातृसूच्यां विशेषगहन- पुनरीक्षणं कार्यान्वयनं कर्तुं सर्वोच्चन्यायालयस्यानुगुणं निर्वाचानायोगेन दिंगनिर्देशाः प्रख्यापिताः। अत्रावधेयं यत् अनया प्रक्रियया नाम्नां सूची सार्वजनिकरूपेण अनिवार्यतया प्रकाशिता भविष्यति।

## बीटिंग रिट्रीट समारोहस्य

अद्यारभ्य बीटिंग रिट्रीट समारोहस्य पूर्वाभ्यास- कारणात् नवदिल्ल्याः बहुषु क्षेत्रषु गमनागमनं बाधितं स्यात्। यानस्य तावत् बाध्यता विजय चौक इत्यत्र सायं चर्तुवादनात् सार्ध षड्वादनं यावत् भविष्यति।

कृषि भवनं परितः अपि वाहनानां गमनागमनं न भविष्यति। पूर्वाभ्यासावधौ शिकोह मार्ग, कृष्णा मेनन मार्ग, सुनेहरी मस्जिद क्षेत्रेषु च वाहनानां बाध्यता भवेत्। वाहन चालकेभ्यः निर्देशः प्रख्यापितः यत् ते पूर्वमेव यात्रायाः योजानाम् कुर्यः इति।

**पुरुष- क्रिकेट**

पुरुष- क्रिकेट- क्रीडायां ह्यः नागपुरे पञ्च- क्रीडा-शृङखलायाः प्रथमायां टी-20 क्रीडायां भारतीय दलेन न्यूजीलैण्डदलं अष्टचत्वारिंशतं- अङ्कैः पराजितम्। पञ्च- क्रीडा- शृङखलायाः द्वितीया स्पर्धा श्वः रायपुरस्य शहीद वीर नारायण सिंह अंताराष्ट्रीय क्रीडाङगणे भविष्यति। इयं च स्पर्धा सायं सप्त वादने समारप्स्यते।

**बैडमिण्टन**

बैडमिण्टन क्रीडायाः पुरुषैकल स्पर्धायां भारतस्य लक्ष्य सेनः हांगकांगदेशस्य जेसन गुनावनं सम्मुखी करिष्यति। अपि च  किदांबी श्रीकांतस्य स्पर्धा चीनस्य ताइपे के चाउ तिएन-चेन इत्यनेन सह भविष्यति।

**।। इति वार्ता:।।**